Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ तर्कसंग्रहव्याख्यान्यायबोधिनीप्रारभ्यते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥श्रीगणेशायनमः॥श्रीगोपीजनवल्लभायनमः॥ अखिलागमसंचारिश्रीकृष्णाख्यंपरंमहः॥ध्या
त्वागोवर्धनस्सुधीस्तनुतेन्यायबोधिनीं॥१॥ चिकीर्षितस्यग्रंथस्यनिर्विघ्नपरिसमाप्त्यर्थंइष्टदेवता
नमस्कारात्मकंमंगलंशिष्यशिक्षार्थंग्रंथादौनिबध्नाति॥निधायेति॥ अथपदार्थान्विभजते॥द्र॰
व्येति॥तत्रसप्तग्रहणंपदार्थत्वंद्रव्यादिसप्तान्यतमत्वव्याप्यमितिव्याप्तिलाभाय॥ ननुशक्तिपदा
र्थस्यअष्टमस्यसत्वात्कथंसप्तैवेति॥ तथाहिवन्हिसंयुक्तेंधनादौसत्यपिमणिसंयोगेदाहोनजाय
ते॥ तच्छून्येनतुजन्यते॥अतोमणिसमवधानेशक्तिर्नश्यति॥मण्यभावदशायांदाहानुकूलाश॰
क्तिरुत्पद्यतेइतिकल्प्यते॥ तस्माच्छक्तिरतिरिक्तपदार्थइतिचेन्न॥मणेःप्रतिबंधकत्वेनमण्यभावस्य॰
कारणत्वेनैवनिर्वाहेमणिसमवधानासमवधानाभ्यांअनंतशक्तितत्तध्वंसतत्तत्प्रागभावकल्पनायाः
अन्याय्यत्वात्॥ तस्मात्सप्तैवेतिसिद्धं॥ द्रव्याणिविभजतेपृथिवीति॥नन्वंधकारस्यदशमद्रव्य॰
स्यसत्वात्कथंनवैवेति॥ तथाहि॥नीलंतमश्चलतीतिप्रतीतेर्नीलरूपाश्रयत्वेनक्रियाश्रयत्वेनच

For Private and Personal Use Only

कस्य
द्रव्यत्वंसिद्धं॥ नचक्लृप्तद्रव्येष्वंतर्भावात् कुतोदशमद्रव्यत्वमितिवाच्यं॥ आकाशादिपंचनीरूपत्वा
त्वायोश्चनीरूपत्वान्नतेष्वंतर्भावः॥ तमसोनिर्गंधत्वान्नपृथिव्यामंतर्भावः॥ जलतेजसोःशीतो॰
ष्णस्पर्शविरहान्नतयोरंतर्भावः॥ तस्मात्तमसोदशमद्र—व्यत्वंसिद्धमितिचेन्न॥ तेजोऽभावेनैवोपप
त्तौअतिरिक्तकल्पनायांमानाभावात्॥ नचविनिगमनाविरहात्तेजसएवतमोऽभावस्वरूपतास्त्वि
तिवाच्यं॥ तेजसोऽभावस्वरूपत्वेसर्वानुभूतोष्णस्पर्शाश्रयद्रव्यांतरकल्पनेगौरवात् उष्णस्पर्शरू
पगुणाश्रयतयातेजसोद्रव्यत्वंसिद्धं॥ तमसिरूपवत्तीतिस्तुभ्रांतिरेव॥ दीपापसरणक्रियायाए
वतत्रभानात्॥ गंधवतीति॥ गंधवत्त्वंपृथिव्यालक्षणं॥ लक्ष्यापृथिवी॥ पृथिवीत्वंलक्ष्यतावच्छे
दकंयत्धर्मावच्छिन्नंलक्ष्यंसधर्मोलक्ष्यतावच्छेदकः॥ योधर्मोयस्यामवच्छेदकः तद्धर्मावच्छिन्ना
लक्ष्यता॥ तथाचलक्ष्यतावच्छेदकंपृथिवीत्वंचेल्लक्ष्यतापृथिवीत्वावच्छिन्ना॥ एवंशीतस्पर्शादि॰
लक्षणेषुजलादीनांलक्ष्यताजलत्वादीनांलक्ष्यतावच्छेदकत्वंबोध्यं॥ एवंपृथिव्यादित्रिकंनिरूप्य

For Private and Personal Use Only

वायुंनिरूपयति रूपरहितेति ॥ रूपरहितत्वेसति स्पर्शवत्त्वं वायोर्लक्षणं ॥ सतिसप्तम्याविशिष्टा॰
र्थकतयारूपरहितत्वविशिष्टस्पर्शवत्त्वंवायोर्लक्षणं ॥ विशेषणानुपादानेस्पर्शवत्त्वमात्रस्यलक्षण
त्वेपृथिव्यादित्रिकेअतिव्याप्तिः ॥ तत्रापिस्पर्शवत्त्वस्यसत्वादतउक्तंरूपरहितेति ॥ विशेष्यानुपाद
नेआकाशादिपंचकेचातिव्याप्तिरतउक्तंस्पर्शेति ॥ अतिव्याप्तिर्नाम ॥ अलक्ष्येलक्षणगमनं ॥
यथा ॥ गोःशृंगित्वंलक्षणमुक्तंचेदलक्ष्यभूतगोभिन्नमहिष्यादावतिव्याप्तिस्तत्रापिशृंगित्वस्य
विद्यमानत्वात् ॥ अव्याप्तिर्नाम ॥ लक्ष्यैकदेशावृत्तित्वं ॥ यथा ॥ गोर्नीलरूपवत्वंलक्षणमुक्तंचे
त् ॥ लक्ष्यतावच्छेदकाश्रयीभूतश्वेतगविनीलरूपाभावात् ॥२॥ असंभवोनामलक्ष्यमात्रेकुत्रा
पिलक्षणाभावः यथागोरेकशफवत्वंगोसामान्यस्यद्विशफवत्वेनएकशफवत्वाभावात् अति
व्याप्त्यव्याप्त्यसंभवानांनिष्कृष्टलक्षणानि ॥ अतिव्याप्तिस्तु लक्ष्यतावच्छेदकावच्छिन्नप्र
तियोगिताकभेदसामानाधिकरण्यं ॥ अव्याप्तिस्तु ॥ लक्ष्यतावच्छेदकसमानाधिकरणात्यंता

भावप्रतियोगित्वं ॥ असंभवस्त ॥ लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वं ॥ आकाशंल
क्षयति ॥ शब्दगुणकमिति ॥ ५ ॥ गुणपदमाकाशेशब्दस्यविशेषगुणइतिद्योतनाय ॥ नत्वति
व्याप्तिवारणाय ॥ समवायेनशब्दवत्त्वमात्रस्यसम्यक्त्वात् ॥ तच्चैकमिति ॥ अनेकत्वेमानाभ
वादितिभावः ॥ विभ्विति ॥ सर्वमूर्तद्रव्यसंयोगित्वंविभुत्वं ॥ मूर्तत्वंचक्रियावत्त्वं पृथिव्यप्तेजो
वायुमनांसिमूर्तानि ॥ पृथिव्यप्तेजोवाय्वाकाशादिपंचकंभूतपदवाच्यंभूतत्वंनामबहिरिंद्रिय
ग्राह्यविशेषगुणवत्त्वं ॥ कालंलक्षयति ॥ अतीतेति ॥ ६ ॥ व्यवहारहेतुत्वस्यलक्षणत्वेव्यवहारहे
तुभूतघटादावतिव्याप्तिस्तद्वारणाय अतीतेतिविशेषणोपादानं ॥ दिशोलक्षणमाह ॥ प्राच्येति ॥
उदयाचलसन्निहितायासादिक्प्राची ॥ मेरोः संनिहितायादिक्सा उदीची मेरोर्व्यवहितायादि
क्सा अवाची आत्मानं निरूपयति ज्ञानाधिकरणमिति अधिकरणपदं समवायेनज्ञानाश्रयत्वला
भार्थं ॥ ९ ॥ मनोनिरूपयति ॥ सुखादीति ॥ उपलब्धिर्नामसाक्षात्कारः ॥ तथाचसुखदुःखादिसा

न्या॰ बो॰ क्षात्कारकारणत्वेसति इंद्रियत्वंमनसोलक्षणं॥ इंद्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिः॥ आत्मं
३ नोज्ञानादिकंप्रतिसमवायिकारणत्वात्॥अतः इंद्रियत्वोपादानं॥ रूपंलक्षयति ॥ चक्षुरिति॥च
क्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वंरूपस्यलक्षणं विशेष्यमात्रोपादानेरसादावतिव्याप्तिः॥ अतः
चक्षुर्मात्रग्राह्यत्वविशेषणं॥ तावन्मात्रोपादानेरूपत्वेऽतिव्याप्तिः॥ योगुणोयदिंद्रियग्राह्यस्त
न्निष्ठाजातिस्तदिंद्रियग्राह्यइतिनियमात् तद्वारणायविशेष्योपादानं॥ चक्षुर्मात्रग्राह्यत्वंनाम
चक्षुर्भिन्नेंद्रियाग्राह्यत्वेसतिचक्षुर्ग्राह्यत्वं॥ मात्रपदानुपादानेसंख्यादिसामान्यगुणेऽतिव्याप्तिः
संख्यादावपिचक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्यसत्वात्॥ अतस्तद्वारणायमात्रपदं॥ संख्यादे
श्चक्षुर्भिन्नत्वगिंद्रियग्राह्यत्वात् चक्षुर्मात्रग्राह्यत्वंनास्ति अतींद्रियगुरुत्वादावतिव्याप्तिवारणा
यचक्षुर्ग्राह्येति॥ अत्रलक्षणेग्राह्यत्वंनामप्रत्यक्षविषयत्वं॥ अग्राह्यत्वंनामतदविषयत्वं॥ तथा राम॰
चत्वक्साक्षात्काराविषयत्वेसतिचाक्षुषप्रत्यक्षविषयत्वेसतिगुणत्वमितिफलितोर्थः॥ ननुप्र ३

भाभित्तिसंयोगेतिव्याप्तिः॥ तस्यचक्षुर्मात्रग्राह्यगुणत्वादितिचेन्न॥गुणपदस्यविशेषगुणपर
त्वात्॥ नचैवंविशेषगुणत्वघटितलक्षणेसंख्यादावतिव्याप्त्यभावान्मात्रपदवैयर्थ्यमिति वा
च्यं॥जलमात्रवृत्तिसांसिद्धिकद्रवत्वेऽतिव्याप्तिवारणायतदुपादानात्॥ अथवाचक्षुर्मात्रग्राह्य
जातिमद्गुणत्वस्यलक्षणत्वान्नप्रभाघटसंयोगेरूपलक्षणस्यातिव्याप्तिः॥ संयोगत्वजातेश्चक्षु
र्मात्रग्राह्यत्वाभावात्। घटपटसंयोगस्यत्वगिंद्रियग्राह्यत्वात्तद्गतजातेरपित्वगिंद्रियग्राह्यत्वा
त्॥ अत्रजातिघटितलक्षणेगुणत्वानुपादानेचक्षुर्मात्रग्राह्यजातिमतिसुवर्णादावतिव्याप्तिर
तस्तद्वारणायतदुपादानं॥ एवंरसादिलक्षणेविशेषणानुपादानेलस्यभिन्नगुणादावतिव्या
प्तिः॥ विशेष्यानुपादानेलस्यमात्रवृत्तिरसत्वगंधत्वादावतिव्याप्तिः॥ अतोविशेषणविशेष्य
योरुपादानं॥ स्पर्शलक्षयति त्वगिंद्रियमात्रग्राह्येति॥ अत्रापिमात्रपदंसंख्यादिसामान्यगु
णादावतिव्याप्तिवारणाय अन्यविशेषणकृत्यंपूर्ववद्बोध्यं॥ग्राह्यत्वपदार्थोपिपूर्ववदेवबो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्यः ॥ रूपादिचतुष्टयंपृथिव्यांपाकजमिति ॥ एतत्तत्त्वनिर्णयश्चेत्थं ॥ पाकोनामविजातीयतेजःसंयो
गः ॥ सचनानाजातीयः ॥ रूपजनकोविजातीयतेजःसंयोगः ॥ तदपेक्षयारसजनकोविजातीयः ॥
एवंगंधजनकोपिएवंस्पर्शजनकोपितथा ॥ एवंप्रकारेणभिन्नभिन्नजातीयाःपाकाःकार्यवैलक्ष
ण्येनकल्पनीयाः ॥ तथाहि ॥ तृणपुंजनिक्षिप्तेआम्रादौउष्णत्वलक्षणविजातीयतेजःसंयोगात्
पूर्वहरितरूपनाशेरूपांतरस्यपीतादेरुत्पत्तिः ॥ पूर्वरसस्याम्लस्यैवानुभवात् क्वचित्पूर्वहरितरू
पसत्त्वेपिरसपरावृत्तिर्दृश्यते ॥ विजातीयतेजःसंयोगरूपपाकवशात्पूर्वतनाम्लरसनाशेमधुर
रसस्यानुभवात् तस्माद्रूपजनकापेक्षयारसजनकोविलक्षणएवांगीकार्यः ॥ एवंगंधजनकोवि
लक्षणएव ॥ रूपरसयोरपरावृत्तावपिपूर्वगंधनाशेविजातीयपाकवशात्सुरभिगंधोपलब्धेः ॥ ए
वंस्पर्शजनकोपिपाकवशात्कठिनस्पर्शनाशेमृदुस्पर्शानुभवात्तस्माद्रूपादिजनकाविजातीया
एवपाकाः ॥ अतएवपार्थिवपरमाणूनांएकजातीयत्वेपिपाकमहिम्नाविजातीयद्रव्यांतरानु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवः यथा गोभुक्ततृणादीनामापरमाण्वंतं भंगे तृणारंभकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशे तदनंतरं दुग्धेयादृशं रूपादिकं वर्त्तते तादृशरूपरसगंधस्पर्शजनका तेजःसंयोगा जायंते ॥ तदुत्तरं तादृशरूपाद्यउत्पद्यंते ॥ तादृशरूपादिविशिष्टपरमाणुभिर्दुग्धद्व्यणुकमारभ्यते ॥ ततः त्र्यणुकादिक्रमेण महादुग्धारंभकैः परमाणुभिरेव दध्यारभ्यते ॥ एवं दध्यारंभकैरेव परमाणुभिर्नवनीतादिकमितिदिक् ॥५॥ विभागं लक्षयति ॥ संयोगेति ॥ संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणं विशेषणमात्रोपादाने क्रियायामपि संयोगनाशकत्वसत्वात्तत्रातिव्याप्तिवारणाय गुणत्वविशेष्योपादानं ॥ गुरुत्वं लक्षयति आद्येति ॥ द्वितीयादिपतनक्रियायां वेगस्यासमवायिकारणत्वात्तत्रातिव्याप्तिवारणायाद्येति ॥ उत्तरत्रस्यंदने आद्यविशेषणमपि पूर्ववदेव योजनीयं ॥ स्नेहं लक्षयति ॥ चूर्णादीति ॥ चूर्णादिपिंडीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणं ॥ पिंडीभावो नाम चूर्णादेर्धारणाकर्षणहेतुभूतो विलक्षणः संयोगः तादृशसंयोगे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नेहस्यैवासाधारणकारणत्वं ॥ नतुजलादिगतद्रवत्वस्य ॥ तथासति द्रुतसुवर्णादिसंयोगे चू-
र्णादेः पिंडीभावापत्तेः ॥ अतःस्नेहस्यैवासाधारणकारणत्वं ॥ विशेषणमात्रोपादाने कालादावति
व्याप्तिरतस्तद्वारणाय विशेष्योपादानं ॥ वस्तुतस्तु द्रुतजलसंयोगस्यैव पिंडीभावहेतुत्वं ॥ स्नेह-
स्य पिंडीभावहेतुत्वे मानाभावात् ॥ जले द्रुतत्वविशेषणात्करकादिव्यावृत्तिः ॥१२॥ शब्दं लक्षय-
ति ॥ श्रोत्रेति ॥ शब्दत्वेति व्याप्तिवारणाय गुणपदं रूपादावतिव्याप्तिवारणाय श्रोत्रेति ॥ सत्रिविधः ॥
संयोगजो विभागजः शब्दजश्चेति ॥ भेरीदंडसंयोगजो मृदंगादशब्दः ॥ वंशेपाट्यमाने दलद्वयवि-
भागजश्चटचटशब्दः ॥ शब्दोत्पत्तिमारभ्य श्रोत्रदेशपर्यंतं निमित्तपवनेन शब्दधाराजायंते ॥
तत्र उत्तरशब्दे पूर्वशब्दः कारणं ॥ बुद्धेर्लक्षणमाह ॥ सर्वव्यवहारेति ॥ व्यवहारःशब्दप्रयोगः ज्ञा-
नविना शब्दप्रयोगासंभवात् शब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणं ॥ बुद्धिं विभजते
॥ साद्विविधेति ॥ स्मृतिं लक्षयति ॥ संस्कारेति ॥ बहिरिंद्रियाजन्यत्वविशिष्टसंस्कारजन्यत्वविशिष्ट

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानत्वंस्मृतेर्लक्षणं ॥ विशेष्यमात्रोपादानेप्रत्यक्षानुभवेतिव्याप्तिः तद्वारणायविशेषणोपादानं
॥ संस्कारध्वंसेतिव्याप्तिवारणायविशेष्योपादानं ॥ ध्वंसंप्रतिप्रतियोगिनःकारणत्वात् संस्कारध्वं
सेपिसंस्कारजन्यत्वस्यसत्वात् प्रत्यभिज्ञायामतिव्याप्तिवारणायमात्रपदं ॥ अनुभवंलक्षयति
॥ तद्भिन्नमिति ॥ तद्भिन्नत्वंनामस्मृतिभिन्नत्वं ॥ स्मृतिभिन्नत्वविशिष्टज्ञानत्वंअनुभवस्यलक्षणं ॥
तत्रविशेषणानुपादानेस्मृतावतिव्याप्तिः ॥ विशेष्यानुपादानेघटादावतिव्याप्तिः ॥ अतस्तद्वारणा
यविशेषणविशेष्ययोरुभयोरुपादानं ॥ अनुभवंविभजते ॥ सद्विविधइति ॥ यथार्थानुभवंलक्ष
यति ॥ तद्वतीति ॥ तद्वतीत्यत्रसप्तम्यर्थोविशेष्यकत्वं ॥ तच्छब्देनप्रकारीभूतोधर्मोधर्त्तव्यः ॥ त
थाच तद्वद्विशेष्यकत्वेसतितत्प्रकारकत्वेसतिअनुभवत्वंयथार्थानुभवस्यलक्षणं ॥ उदाहरणं ॥
रजतेइदंरजतमितिज्ञानं ॥ रजतत्ववद्विशेष्यकत्वेसतिरजतत्वप्रकारकत्वं ॥ तद्वन्निष्ठविशेष्य
तानिरूपिततन्निष्ठप्रकारतानिरूपितप्रकारिताशाल्यनुभवत्वमितिफलितोर्थः ॥ अन्यथायथा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुते रंगरजतयोरिमे रजतरंगे इत्याकारकसमूहालंबनभ्रमेतिव्याप्तिः॥ तत्रापि रजतत्ववद्विशेष्यक
त्वरजतत्वप्रकारकत्वयोःसत्वात्॥ रंगविशेष्यकत्वरंगत्वप्रकारकत्वयोश्चसत्वात्॥ उक्तनिष्क
र्षेतु दर्शितभ्रमेनातिव्याप्तिः॥ समूहालंबनभ्रमस्यरंगांशेरजतत्वावगाहित्वेनरजतांशेरंगत्वाव
गाहित्वेन च रजतत्वप्रकारतायाः रजतत्ववद्विशेष्यतानिरूपितत्वाभावात्॥ एवंरंगत्वप्रकारता
याः रंगत्ववद्विशेष्यतानिरूपितत्वाभावाच्चेति॥ अयथार्थानुभवंलक्षयति॥ तदभाववतीति॥ अ
त्रापि पूर्ववत् तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपितप्रकारिताशाल्यनुभ
वत्वंविवक्षणीयं॥ अन्यथारंगरजतयोरिमेरंगरजते इत्याकारकसमूहालंबनप्रमायामतिव्याप्तिः॥ एतत्स
मूहालंबनस्यरंगरजतोभयविशेष्यकत्वेनरजतत्वंरंगत्वोभयप्रकारकत्वेनरजतांशेरजतत्वावगाहित्वेनरंगांशेरं
गत्वावगाहित्वेनरजतत्वप्रकारतायाः रजतत्वाभाववद्रंगविशेष्यतानिरूपितत्वाभावात् एवं
रंगत्वप्रकारतायारंगत्वाभाववद्रजतविशेष्यतानिरूपितत्वाभावान्नातिव्याप्तिः॥ उदाहरणं॥

For Private and Personal Use Only

यथाशुक्ताविदंरजतमितिज्ञानं ॥ यथार्थानुभवंविभजते ॥ यथार्थानुभवइति ॥ तत्करणमिति ॥
फलीभूतप्रत्यक्षादिकरणंचतुर्विधमित्यर्थः प्रत्यक्षादिचतुर्विधप्रमाणानांप्रमाकरणत्वंसामान्य
लक्षणं ॥ एकैकप्रमाणलक्षणंतुवक्ष्यते प्रत्यक्षज्ञानेत्यादिना ॥ करणलक्षणमाह ॥ असाधारण
मिति ॥ व्यापारवदसाधारणकारणंकरणमित्यर्थः असाधारणत्वंचकार्यत्वातिरिक्तधर्मावच्छिन्न
कार्यतानिरूपितकारणताशालित्वमित्यर्थः ॥ यथा दंडादेर्घटादिकंप्रत्यसाधारणकारणत्वं ॥ कार्य
त्वातिरिक्तघटत्वादिरूपधर्मस्तदवच्छिन्नकार्यताघटेतन्निरूपितकारणता दंडे ॥ अतोघटंप्रति
दंडः असाधारणकारणंभवति ॥ भ्रम्यादिरूपव्यापारवत्वाच्चकरणं ॥ साधारणकारणत्वं कार्यत्वा
वच्छिन्नकार्यतानिरूपितकारणताशालित्वं ॥ ईश्वरादृष्टादेःकार्यत्वा वच्छिन्नंप्रत्येनकारणत्वा
त्साधारणकारणत्वं ॥ नियतत्वविशेषणानुपादानेपूर्ववर्त्तिनोरासभादेरपिघटादिकारणत्वंस्या
त् ॥ अतोनियतेति ॥ नियतपूर्ववर्तिनो दंडरूपादेरपिघटकारणत्वंस्यात ॥ अतोः नन्यथासि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रूपदमपिकारणलक्षणेनिवेशनीयं ॥ दंडरूपादीनांतुअन्यथासिद्धत्वात् ॥ कार्यंलक्षयति ॥
कार्यमिति ॥ प्रागभावप्रतियोगित्वंकार्यस्यलक्षणं ॥ कार्योत्पत्तेःपूर्वंइहघटोभविष्यतीतिप्रती-
तिर्जायते॥तत्प्रतीतिविषयीभूतोयोऽभावस्तत्प्रतियोगिघटादिरूपंकार्यं॥कारणंविभजते॥कारणं
त्रिविधमिति ॥समवायिकारणंलक्षयति ॥ यत्समवेतमिति ॥ यस्मिन्समवेतंसत्समवायेनसंब
द्धंसत्कार्यमुत्पद्यतेतत्समवायिकारणमित्यर्थः उदाहरणंयथातंतवइति॥तंतुषुसमवायेनसंब-
द्धंसत्पटात्मकंकार्यमुत्पद्यतेतत्समवायिकारणमित्यर्थः ॥सामान्यलक्षणंतुसमवायसंबंधावच्छि
न्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणत्वंसमवायिकारणत्वं ॥समवायसंबंधेनघटा
धिकरणेकपालादौकपालादेः तादात्म्यसंबंधेनैवसत्वात्॥समवायसंबंधावच्छिन्नघटत्वावच्छि
न्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणतायाकपालादौसत्वाल्लक्षणसमन्वयः॥ज

न्यभावत्वावच्छिन्नंप्रतितादात्म्यसंबंधेनद्रव्यस्यैवहेतुत्वात्॥जन्यभावेषुद्रव्यगुणकर्मसुत्रिषु

For Private and Personal Use Only

द्रव्यमेवसमवायिकारणंद्रव्येअवयवाःसमवायिकारणं॥ अतोगुणादावपिद्रव्यमेवसमवायि
कारणमित्याशयेनाहपटश्चस्वगतरूपादेरिति॥समवायिकारणमित्यनुषज्यते॥ असमवायिका
रणंलक्षयतिकार्येणेति॥असमवायिकारणंद्विविधं॥ कार्येणसहैकस्मिन्नर्थेसमवेतंसत्यत्कार
णंतदसमवायिकारणमित्यर्थः॥कारणेनसहैकस्मिन्नर्थेसमवेतंसत्कारणसमवायिकारणमित्य
परमित्यर्थः॥ अत्रकारणेनेत्यस्यस्वकार्यसमवायिकारणेनेत्यर्थः॥जन्यद्रव्यमात्रेअवयवसंयोग
स्यैवासमवायिकारणत्वात्पटात्मककार्येतदवयवतंतुसंयोगस्यैवासमवायिकारणत्वंदर्शयन्नथ
ममुदाहरति॥ यथातंतुसंयोगःपटस्येति॥ पटात्मक कार्येणसहैकस्मिन्नर्थेतंतौसमवायसंबंधे
नविद्यमानत्वेसतिकारणत्वात्पटात्मककार्यंप्रतितंतुसंयोगोऽसमवायिकारणमित्यर्थः॥द्वितीयमु
दाहरति॥तंतुरूपमिति॥कारणेनस्वकार्यकारणीभूतपटेनसहएकस्मिन्नर्थेतंतौसमवेतंसत्सम
वायसंबंधेनवर्त्तमानंसत् तंतुरूपंपटगतरूपंप्रतिकारणंभवति अतोसमवायिकारणंतंतुरूपंपट

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गतरूपस्य ॥ सामान्यलक्षणंतुसमवायसंबधावच्छिन्नकार्यतानिरूपितायासमवायस्वसमवा
यिसमवेतत्वान्यतरसंबंधावच्छिन्नाकारणतातदाश्रयत्वं ॥ द्रव्यासमवायिकारणीभूतावयवसं
बंधेतुसमबायसंबंधावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपितसमवायसंबंधावच्छिन्नाकपाल
द्वयसंयोगत्वावच्छिन्नाकारणताकपालद्वयसंयोगेवर्त्तते ॥ एवं आद्यपतनक्रियायांआद्यस्यंदन
क्रियायांचगुरुत्वद्रवत्वे असमवायिकारणेभवतः आद्यपतनक्रियांप्रतिआद्यस्यंदनक्रियांप्रति
चतयोः समवायसंबंधेनैवकारणत्वात् अवयविगुणभूतघटपटरूपादौत्ववयवगुणभूतकपा
लतंतुरूपादेः स्वपदग्राह्यकपालतंतुरूपादिसमवायिकपालतंत्वादिसमवेतत्वसंबंधेनैवका
रणत्वात्तत्संबंधावच्छिन्नकारणताश्रयत्वं अवयवगुणभूतकपालरूपतंतुरूपादौवर्ततइतिल
क्षणसंगतिः ॥ निमित्तकारणंलक्षयतितदुभयभिन्नमिति ॥ समवायिकारणभिन्नत्वेसति अस
मवायिकारणभिन्नत्वेसतिकारणत्वंनिमित्तकारणस्यलक्षणमित्यर्थः ॥ करणलक्षणमुपसंहर

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्ति॥ तदेतदिति ॥ यदसाधारणमिति ॥ व्यापारवत्वेसतीत्यपिपूरणीयं ॥ अन्यथा तंतुकपालसंयो
गयोरतिव्याप्तिः॥ तंतुकपालसंयोगयोरपिकार्यत्वातिरिक्तपटत्वघटत्वावच्छिन्नंप्रतिकारणत्व
मस्त्येवेति अतस्तत्रकरणत्ववारणायव्यापारवत्वेसतीतिकरणलक्षणेविशेषणंदेयं॥ व्यापारवत्वं
वतज्जन्यत्वेसतितज्जन्यजनकत्वं॥ भवतिहिदंडजन्यत्वेसति दंडजन्य घटजनकत्वाद्भ्रम्यादेरतो दंडव्याप
रत्वं॥ एवंकपालतंतुसंयोगादेरपिकपालतंतुव्यापारत्वं॥ कपालतंतुजन्यत्वेसतिकपालतंतुज
न्यघटपटजनकत्वात्॥ करणलक्षणेऽसाधारणत्वानुपादाने ईश्वरादृष्टादेरपिव्यापारवत्वात्करणत्वं
स्यात् तत्रातिव्याप्तिवारणायासाधारणेतिविशेषणं॥ षड्विधेंद्रियभूतप्रत्यक्षप्रमाणस्यलक्षणमाह॥
तत्रेति॥ प्रमाभूतेषुप्रत्यक्षात्मकंज्ञानंचाक्षुषादिप्रत्यक्षं तत्प्रतिव्यापारवदसाधारणकारणमिंद्रियं
भवति ॥ अतःप्रत्यक्षज्ञानकरणत्वंप्रत्यक्षस्यलक्षणं॥ आद्यसन्निकर्षातिरिक्तचतुर्विधसन्निकर्षा
णांसमवायरूपत्वेनेंद्रियजन्यत्वाभावाद्व्यापारत्वंनसंभवति॥ इंद्रियमनःसंयोगस्यैवव्यापारत्वं प्रत्य

न्या॰बो॰ क्षेजननीयेइंद्रियव्यापारता बोध्या ॥ मानसप्रत्यक्षेतुआत्ममनःसंयोगस्यैवसा बोध्या ॥ प्रत्य
९ क्षप्रमाणलक्षणमुक्त्वाप्रत्यक्षप्रमालक्षणमाह ॥ ज्ञानाकरणमिति ॥ प्रत्यक्षप्रमालक्षणं ॥ व्याप्ति
ज्ञानंसादृश्यज्ञानंपदज्ञानंच तदेवकरणंयेषांते अनुमित्युपमितिशाब्दाः तद्भिन्नत्वंप्रत्यक्षस्य ॥
प्रत्यक्षे इंद्रियस्यैवकरणत्वंनतुज्ञानस्यकरणत्वं इदंलक्षणमीश्वरप्रत्यक्षसाधारणं ॥ ईश्वरप्र॰
त्यक्षस्याजन्यत्वात् जन्यप्रत्यक्षस्यैवलक्षणाभिप्रायेणोत्तरमाह ॥ इंद्रियार्थसन्निकर्षेति ॥ जन्यप्र
त्यक्षस्यैवलक्षणत्वाभिप्रायेणेदंलक्षणंविभजते ॥ निर्विकल्पकमिति ॥ तल्लक्षयति ॥ निष्प्रकारकमिति
प्रकारताशून्यज्ञानत्वमेवनिर्विकल्पकत्वमित्यर्थः निर्विकल्पकेचतुर्थविषयतास्वीक्रियते ॥ त्रिविध
विषयतामध्येएकापितत्रनास्त्यतोविशेष्यताशून्यज्ञानत्वंसंसर्गताशून्यज्ञानत्वमित्यपिलक्ष
णंसंभवति ॥ सविकल्पकंलक्षयति ॥ सप्रकारकमिति ॥ विषयतायाज्ञाननिरूपितत्वाद्ज्ञानस्य राम॰
विषयतानिरूपकत्वेनप्रकारतानिरूपकज्ञानत्वंसविकल्पकस्यलक्षणं ॥ एवंविशेष्यतानिरूपक ९

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानत्वंसंसर्गतानिरूपकज्ञानत्वमित्यपिलक्षणंसंभवति॥उदाहरणंयथेति॥इदंत्वावच्छिन्न
विशेष्यतानिरूपकंडित्थत्वप्रकारकज्ञानंसविकल्पकमित्यर्थः॥चाक्षुषादिप्रत्यक्षकारणीभू
तान् षड्विधसंन्निकर्षान्विभजते॥संयोगइत्यादिना॥द्रव्यवृत्तिलौकिकविषयतासंबंधेनचाक्षु
षत्वावच्छिन्नंप्रतिचक्षुःसंयोगःकारणं॥द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेनचाक्षुषत्वाव
च्छिन्नंप्रतिचक्षुःसंयुक्तसमवायस्यहेतुत्वं॥द्रव्यग्राहकाणींद्रियाणित्रीण्येव॥चक्षुस्त्वङ्मनां
सि॥अन्यानिघ्राणरसनश्रवणानिगुणग्राहकाणि॥अतस्त्वगिंद्रियस्थलेद्रव्यवृत्तिलौकिकवि
षयतासंबंधेनत्वाचप्रत्यक्षत्वावच्छिन्नंप्रतित्वक्संयोगस्यहेतुता॥एवंद्रव्यसमवेतत्वाचप्र
त्यक्षत्वावच्छिन्नंप्रतित्वक्संयुक्तसमवायस्यहेतुता॥द्रव्यसमवेतसमवेतोष्णत्वशीतत्वा
दिजातिस्पर्शनप्रत्यक्षेसंयुक्तसमवेतसमवायस्यहेतुता॥एवमात्ममानसप्रत्यक्षेमनःसंयो
गस्यहेतुता॥आत्मसमवेतसुखादिप्रत्यक्षेमनःसंयुक्तसमवायस्यहेतुता॥आत्मसमवेतस

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मवेतस्करवत्वादिप्रत्यक्षेमनःसंयुक्तसमवेतसमवायस्यहेतुता॥रसनघ्राणयोस्तुरसगंधतद्गतजा
तिग्राहकत्वेनद्वितीयतृतीययोःसंनिकर्षयोरेवरसगंधादिहेतुतावाच्या॥श्रवणेंद्रियस्याकाशरूप
त्वेनशब्दस्याकाशगुणत्वेनश्रवणेंद्रियेणचसमंशब्दस्यसमवायःसन्निकर्षः॥शब्दवृत्तिशब्दत्व
कत्वादिजातिविषयकश्रावणप्रत्यक्षेसमवेतसमवायस्यहेतुता॥अभावप्रत्यक्षइतिविशेषणवि
शेष्यभावोनामविशेषणतासन्निकर्षः॥पंचसंनिकर्षेषुमध्येसंयोगस्थानेसंयुक्तपदंघटयित्वासम
वायस्थानेसमवेतपदंघटयित्वाअभावस्थलेनिर्वाह्यं॥तथाहि॥द्रव्याधिकरणकाभावप्रत्यक्षेसं
युक्तविशेषणता॥द्रव्यसमवेताधिकरणकाभावप्रत्यक्षेइन्द्रियसंयुक्तसमवेतविशेषणता॥द्रव्य
समवेतसमवेताधिकरणकाभावप्रत्यक्षेइंद्रियसंयुक्तसमवेतसमवेतविशेषणता॥तत्रघटेपटत्वा
भावःसंयुक्तविशेषणतयागृह्यते॥घटसमवेतघटत्वादौपृथिवीत्वाभावःसंयुक्तसमवेतविशेष
णतयागृह्यते।घटसमवेतसमवेतरूपत्वादौनीलत्वाभावश्चसंयुक्तसमवेतसमवेतविशेषणत

For Private and Personal Use Only

याग्रह्यत इतिसंक्षेपः ॥ इतिप्रत्यक्षपरिच्छेदः समाप्तः ॥ अनुमानंलक्षयति ॥ अनुमितिकरणमि
ति ॥ अनुमितौव्याप्तिज्ञानंकरणं ॥ परामर्शोव्यापारः ॥ अनुमितिः फलं ॥ परामर्शस्यव्याप्तिज्ञानज
न्यत्वेसतिव्याप्तिज्ञानजन्यानुमितिजनकत्वात् तज्जन्यत्वेसतितज्जन्यजनकत्वरूपव्यापारत्वमुपपन्नं।अनुमि
तिकरणत्वमनुमानस्यलक्षणं ।।अनुमानंव्याप्तिज्ञानंएतस्यपरामर्शरूपव्यापारद्वाराअनुमिति
प्रत्यसाधारणकारणतयाअनुमितिकरणत्वमुपपन्नं ॥परामर्शजन्यमिति ।।परामर्शजन्यत्वविशि
ष्टज्ञानत्वमनुमितेर्लक्षणं ॥ अत्रज्ञानत्वमात्रोपादानेप्रत्यक्षादावतिव्याप्तिर तस्तद्वारणायपराम
र्शजन्यत्वेसतीतिविशेषणोपादानं ।।परामर्शजन्यत्वमात्रोक्तौपरामर्शध्वंसेतिव्याप्तिरतस्तद्वारण
यज्ञानत्वोपादानं ॥ अनुमितिलक्षणघटकीभूतपरामर्शलक्षणमाचष्टे ॥ व्याप्तिविशिष्टेति ॥ व्याप्तिं
विशिष्टंचतत्पक्षधर्मताज्ञानंचेतिकर्मधारयः ॥ अत्रविशिष्टपदस्यप्रकारतानिरूपकपरत्वात्पक्षधर्म
तायाज्ञानमित्यत्रषष्ठ्याविषयत्वबोधनात् ॥ धर्मतापदस्यसंबंधार्थकत्वात् ॥ कर्मधारयसमा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेनसमस्यमानपदार्थयोरभेदसंसर्गलाभाच्च व्याप्तिप्रकारकाभिन्नंयत्पक्षसंबंधविषयकज्ञानंतत्प
रामर्श इतिलभ्यते॥ एवंसतिधूमोवन्हिव्याप्यः आलोकवान्पर्वत इत्याकारकसमूहालंबनेप्युक्त
परामर्शलक्षणमस्तीत्यतिव्याप्तिस्तद्वारणायपक्षनिष्ठविशेष्यतानिरूपितहेतुनिष्ठप्रकारतानिरूपि
तव्याप्तिनिष्ठप्रकारतानिरूपितप्रकारिताशालिज्ञानंपरामर्श इति निष्कर्षः कर्तव्यः॥ एतादृशपराम
र्शजन्यत्वेसतिज्ञानत्वमनुमितेर्लक्षणं॥अनुमितिपरामर्शयोर्विशिष्यकार्यकारणभावश्चेत्थं॥वह्नि
त्वावच्छिन्नसंयोगसंबंधावच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताशाल्यनुमितित्वावच्छिन्नंप्रतिवह्नि
त्वावच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरू
पितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितविशेष्यिताशालिनिर्णयःकारणं॥ वन्हित्वावच्छिन्नप्रका
रतानिरूपितव्याप्तित्वावच्छिन्नविशेष्यतायाःधूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तित्वावच्छि
न्नप्रकारतायाश्चाभेदानंगीकर्तृमतेवन्हित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नव्या

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाव
च्छिन्नविशेष्यतानिरूपितविशेष्यिताशालिनिर्णयःकारणमितिवाच्यं॥सचनिर्णयः वन्हिव्याप्य
धूमवान्पर्वतइत्याकारकोबोध्यः यत्रयत्रेति॥यत्रपदद्वीप्सा धूमाधिकरणेयावतिवन्हिमत्वलाभा
य॥यावत्वमहिम्नावन्हेर्धूमव्यापकत्वंलब्धं॥तथाचधूमव्यापकवन्हिर्धूमवतीत्यर्थः॥तदेवस्प
ष्टयति॥साहचर्यनियमइति॥नियतसाहचर्यंव्याप्तिरित्यर्थः॥नियतत्वंव्यापकत्वं॥साहचर्यंसामा
नाधिकरण्यं॥तथाचधूमनियतवन्हिसामानाधिकरण्यंव्याप्तिरित्यर्थः॥वन्हेर्धूमव्यापकत्वंचधूमस
मानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्वं॥तथाहि॥धूमाधिकरणेचत्वरमहानसादौ
वर्त्ततेयोऽभावःघटत्वाद्यवच्छिन्नप्रतियोगिताकाभावःनतुवन्हित्वावच्छिन्नप्रतियोगिताकाभावः
॥कुतः चत्वरमहानसादौवन्हेःसत्वात्॥एवंसतिधूमाधिकरणेपर्वतचत्वरादौवर्तमानस्यघटाद्य
भावस्यप्रतियोगितावच्छेदकंघटत्वादिकमनवच्छेदकंवन्हित्वंतद्वत्वंवन्हौवर्त्तते।तोधूमव्यापकः

For Private and Personal Use Only

त्वंवन्हौवर्तते॥तथाच धूमव्यापकवन्हिसामानाधिकरण्यंव्याप्तिरिति फलितं॥ इतीयमन्वयव्याप्तिः
सिद्धांतानुसारेण॥ पूर्वपक्षव्याप्तिस्तुसाध्याभाववद्वृत्तित्वं॥ साध्यतावच्छेदकसंबंधावच्छिन्नसा
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेद
कावच्छिन्नवैय्यधिकरण्यावच्छिन्नाभाववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वत्वा
वच्छिन्नप्रतियोगिताकाभावोव्याप्तिरित्यर्थः॥ तच्चकेवलान्वयिन्यव्याप्तमितिसिद्धांतानुसरणं॥अ
नुमानंविभजते॥स्वार्थमिति॥स्वार्थानुमानंनामन्यायाप्रयोज्यानुमानं॥ तत्प्रयोज्यानुमानंपरा
र्थानुमानं॥ न्यायत्वंचप्रतिज्ञाद्यवयवपंचकसमुदायत्वं॥अवयवत्वंचप्रतिज्ञाद्यन्यतमत्वं॥अ
न्वयेनेति॥साध्यसामानाधिकरण्यरूपान्वयव्याप्तिमानित्यर्थः॥ व्यतिरेकेणेति॥ व्यतिरेकोना
माभावः॥ तथाचसाध्याभावहेत्वभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः॥ अयंचहेतुर्यत्रयत्रवन्ह्यभा
वस्तत्रधूमाभावइति॥ यत्रपदवीप्सयावन्ह्यभाववतियावतिधूमाभावग्रहणेयावत्त्वस्यव्याप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कत्वपरतयाधूमाभावेवन्ह्यभावव्यापकत्वंलभ्यते॥वन्ह्यभावेधूमाभावव्यापकत्वंलभ्यते वन्ह्यभावनिष्ठव्या
प्यत्वंचस्वाश्रयवन्ह्यभावव्यापकीभूताभावप्रतियोगित्वसंबंधेनधूमनिष्ठतयागृह्यतइति॥व्यतिरेकव्याप्ति
मत्वेनान्वयव्याप्तिमत्वेनचान्वयव्यतिरेकित्वेनचगीयते॥व्यतिरेकपरामर्शाकारश्चवन्ह्यभावव्यापकीभू
ताभावप्रतियोगिधूमवानिति ॥केवलान्वयिनोलक्षणमाह॥ अन्वयेति॥व्यतिरेकव्याप्तिशून्य
त्वेसत्यन्वयव्याप्तिमत्वंकेवलान्वयित्वं॥अथवाकेवलान्वयिसाध्यकत्वंतत्॥एतच्चलक्षणंहेतो
र्व्यतिरेकित्वेऽपिसंगच्छते॥ साध्यस्यकेवलान्वयित्वादेवान्वयव्याप्तेरभावादन्वयमात्रव्याप्तिकं
केवलान्वयीतिमूलोक्तलक्षणमुपपन्नं ॥ अत्यंताभावाप्रतियोगित्वंकेवलान्वयित्वं॥नचैवमा
काशाभावेसंयोगाभावेचाव्याप्तिरितिवाच्यं॥ स्वविरोधिवृत्तिमद्वृत्त्यंत्याभावाप्रतियोगित्वस्यै
वतदर्थत्वात्॥ तथाचतयोरेकजातीयसंबंधेनसर्वत्रविद्यमानत्वान्नाव्याप्तिः॥ केवलव्यतिरे
किणोलक्षणमाह॥व्यतिरेकेति॥ निश्चितान्वयव्याप्तिशून्यत्वेसतिव्यतिरेकव्याप्तिमत्वंकेवलव्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिरेकित्वं ॥ यथेति। अत्रपृथिवीत्वावच्छिन्नंपक्षः॥ पृथिवीतरजलादिभेदःसाध्यं॥ गंधवत्वंहेतुः॥
अत्रयद्गंधवत्तदितरेभ्योभिद्यतेयथेत्यन्वयदृष्टांताभावाद्गंधव्यापकेतरभेदसामानाधिकरण्यरू
पान्वयव्याप्तिग्रहासंभवः॥ किंतुयत्रयत्रपृथिवीतरभेदाभावस्तत्रगंधाभावोयथाजलादिकमिति
व्यतिरेकदृष्टांतेजलादावितरभेदाभावरूपसाध्याभावव्यापकतागंधाभावेगृह्यते॥ इममेवार्थमनसि
निधाययदितरेभ्योनभिद्यतेनतद्गंधवद्यथाजलमितिग्रंथेनमूलकारोव्यतिरेकव्याप्तिमेवप्रदर्शित
वान्॥ एवंप्रकारेणव्यतिरेकव्याप्तिग्रहानंतरमितरभेदाभावव्यापकीभूताभावप्रतियोगिगंधवती
पृथिवीत्याकारकव्यतिरेकपरामर्शात्पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नवि
धेयताकापृथिवीइतरभेदवतीत्याकारकानुमितिर्जायतइतितत्वं॥ यथाश्रुतमूलार्थस्तुयज्जलं
इतरेभ्योनभिद्यतेइतरभेदाभाववत् नतद्गंधवत्जलमितरभेदाभावव्यापकगंधाभाववत्॥ नचे
यंतथा॥ इयंपृथिवी॥ नतथा॥ गंधाभाववतीन॥ किंतुतदभावात्मकगंधवती॥ तस्मान्नतथा॥ १

For Private and Personal Use Only

तस्मात्॥ गंधाभावाभाववत्वात् गंधवत्वात्॥ नतथा॥ इतरभेदाभाववतीन॥ किंतु इतरभेदाभावा भाववती इतरभेदवतीतिपर्यवसन्नइति॥ पक्षलक्षणमाह॥ संदिग्धेति॥ साध्यप्रकारकसंदेहविशे ष्यत्वंपक्षत्वं॥ संदेहश्चपर्वतोवन्हिमान्नवेत्याकारकः॥ इदंचलक्षणंअनुमितेः पूर्वसाध्यसंदेहोनि यमेनजायतइत्यभिप्रायेणप्राचीनैःकृतं॥ गगनविशेष्यकमेघप्रकारकसंदेहाभावदशायामपिग्रह मध्यस्थपुरुषस्यघनगर्जितश्रवणेनगगनमेघवदित्याकारकगगनत्वावच्छिन्नोद्देश्यतानिरूपित मेघत्वावच्छिन्नविधेयताकानुमितिदर्शनात् प्राचीनलक्षणंविहायनवीनैरनुमित्युद्देश्यत्वंपक्षत्व मितिस्थिरीकृतं॥ सपक्षलक्षणमाह॥ निश्चितेति॥ साध्यप्रकारकनिश्चयविशेष्यत्वंसपक्षत्वं॥ निश्च यश्चमहानसंवन्हिमदित्याकारकः॥ विपक्षलक्षणमाह॥ निश्चितसाध्याभाववानिति॥ साध्याभाव प्रकारकनिश्चयविशेष्यत्वंविपक्षत्वं॥ निश्चयश्चहृदोवन्ह्यभाववानित्याकारकः॥ सद्धेतून्निरूप्य हेत्वाभासान्निरूपयति॥ सव्यभिचारेति॥ हेतुवदाभासंतइतिहेत्वाभासाः दुष्टहेतवः॥ दोषाश्चव्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिचारविरोधप्रतिपक्षासिद्धिबाधाः॥एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसंबंधेनैतद्विशिष्टा
हेतवइत्यर्थः॥यद्विषयकत्वेनज्ञानस्यानुमितितत्कारणान्यतरप्रतिबंधकत्वंतत्त्वंदोषसामान्यस्यल
क्षणं॥हेतौदोषज्ञानेसत्यनुमितिप्रतिबंधस्तत्कारणप्रतिबंधोवाजायतेऽतोवानिग्रहार्थंवादिनो
ज्ञावितहेतौदोषोद्भावनार्थंदुष्टनिरूपणमितिभावः॥सव्यभिचारंविभज्यदर्शयति॥साधारणेति॥
साधारणाद्यन्यतमत्वंसव्यभिचारसामान्यलक्षणं॥साधारणत्वंसाध्याभाववद्वृत्तित्वं॥पर्वतोवह्नि
मान्प्रमेयत्वादिति॥अत्रप्रमेयत्वहेतौवह्न्यभाववद्वृत्तित्वरूपव्यभिचारेज्ञातेवह्न्यभाववदवृत्ति
त्वरूपव्याप्तिज्ञानप्रतिबंधःफलं॥असाधारणइति॥सर्वसपक्षविपक्षव्यावृत्तत्वं॥साध्यवद्वृत्ति
त्वावच्छिन्नप्रतियोगिताकाभावः हेतौसाध्यवदवृत्तित्वेनिश्चितेसाध्यवद्वृत्तित्वरूपव्याप्तिज्ञान
प्रतिबंधःफलं॥अनुपसंहारिणंलक्षयति॥अन्वयेति॥उभयदृष्टांताभावादन्वयव्याप्तिज्ञानव्यतिरे
कव्याप्तिज्ञानोभयसामग्रीनास्तीत्यर्थः॥किंचिद्विशेष्यकनिश्चयाविषयसाध्यकत्वेसतिकिंचिद्विशे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्यकनिश्चयाविषयसाध्याभावकत्वमेवानुपसंहारित्वं॥एतद्ज्ञानस्यव्याप्तिसंशयजननद्वाराव्या
प्तिज्ञानप्रतिबंधःफलमितिभावः॥वस्तुतस्तुअत्यंताभावाप्रतियोगिसाध्यकत्वमेवानुपसंहारित्व
मितिबोध्यं॥विरुद्धंलक्षयति॥साध्याभावव्याप्तइति॥साध्याभावव्याप्तिःसाध्याभावनिरूपित
व्यतिरेकव्याप्तिःसाध्यव्यापकीभूताभावप्रतियोगित्वं॥तथाचपक्षविशेष्यकसाध्याभावव्याप्यहे
तुप्रकारकज्ञानात्पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबंधःफलं॥एवंसत्प्रतिपक्षेपि॥वि
रुद्धसत्प्रतिपक्षयोर्विशेषस्तु हेतोरेकत्वेन हेत्वोर्द्वित्वेन च ज्ञानम्यः॥साध्याभावव्याप्यप्रकृतहेतुर्वि
रोधः॥साध्याभावव्याप्यप्रतिहेतुमत्पक्षःसत्प्रतिपक्षइतियावत्॥विरुद्धेसाध्याभावसाधकोहेतुः
साध्यसाधकत्वेनोपन्यस्तइत्यसामर्थ्यसूचनमपि॥आश्रयासिद्धइति॥पक्षेपक्षतावच्छेदकवि
रहआश्रयासिद्धिः॥यथेति॥अत्रारविंदेगगनीयत्वाभावेनिश्चिते गगनीयत्वविशिष्टारविंदेसौर
भ्यानुमितिप्रतिबंधःफलं॥स्वरूपासिद्धइति॥स्वरूपासिद्धिर्नामपक्षेहेत्वभावः॥तथाचहेत्व

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावविशिष्टपक्षज्ञानात्पक्षविशेष्यकहेतुप्रकारकपरामर्शप्रतिबंधःफलं॥ व्याप्यत्वासिद्ध इति॥
प्रकृतेधूमव्यापकत्वमार्द्रेंधनेगृहीतंचेत्धूमेआर्द्रेंधनसंयोगव्याप्यत्वंगृह्यते॥एवंवन्हेरव्यापक-
त्वमार्द्रेंधनसंयोगेगृहीतंचेद्वन्हौतद्व्याप्यत्वंगृह्यतेतदेवव्यभिचरितत्वं॥ अर्थादुपाधिव्यभि-
चरितत्वंसाधनेगृहीतंचेदुपाधिभूतार्द्रेंधनसंयोगव्याप्यधूमव्यभिचरितत्वंगृह्यतएव॥अनु
मानप्रकारश्च पूर्वानुमानेहेतुंपक्षीकृत्यवह्निर्धूमव्यभिचारीधूमव्यापकार्द्रेंधनसंयोगव्यभिचरितत्वात्घटत्वा
दिवत् योयद्व्यापकव्यभिचारीसर्वोपितद्व्यभिचारीतिबोध्यः॥एवंप्रकारेणप्रकृतानुमानहेतुभूतपक्षेसाध्यव्यभि
चारोत्थापकतयादूषकत्वमुपाधेःफलं॥तथाचधूमाभाववद्वृत्तित्वाभावरूपधूमव्यभिचारेगृहीतेवह्नौधूमाभाववद्वृत्ति
त्वरूपव्याप्तिज्ञानप्रतिबंधःफलं॥नचव्याप्यत्वासिद्धेर्व्यभिचाराभेदइतिवाच्यं॥धूमाभाववद्वृत्तित्वाभावाभावत्वेनव्याप्य
त्वासिद्धत्वंधूमाभाववद्वृत्तित्वेनव्यभिचारत्वमितिभेदात्। यस्येति। यस्यहेतोःसाध्याभावःसाध्यबाधः॥प्रमा
णांतरेणप्रत्यक्षप्रमाणेनपक्षेनिर्णीतःसबाधितइत्यर्थः तथाचप्रात्यक्षिकसाध्यबाधनिश्चयेजा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेसाध्यानुमितिप्रतिबंधःफलं ॥बाधितसाध्यकत्वाद्बाधितहेतुरित्युच्यते॥ इत्यनुमानपरिच्छेदःस
माप्तः॥ ॥उपमानंलक्षयति॥ उपमितिकरणमिति॥उपमितिंलक्षयति ॥संज्ञासंज्ञीति॥ संज्ञानाम
पदं॥संज्ञीअर्थः॥ तयोःसंबंधःशक्तिः॥ तथाचपदपदार्थसंबंधज्ञानमुपमितिरित्यर्थः॥उपमानं
नामातिदेशवाक्यार्थज्ञानं॥अतिदेशवाक्यार्थस्मरणंव्यापारः॥उपमितिःफलं॥ गोसदृशोगवयपद
वाच्यइत्याकारकवाक्याद्गोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकंयज्ज्ञानंजाय
तेतदेवकरणं॥ ॥इत्युपमानपरिच्छेदःसमाप्तः॥ शब्दंलक्षयति॥आप्तेति॥आप्तोच्चरितत्वेसति
वाक्यत्वंलक्षणं॥प्रमाणशब्दत्वंलक्ष्यतावच्छेदकं॥वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येतिव्या
प्तिरतआप्तोच्चरितत्वनिवेशः तावन्मात्रोक्तौजवगडदशादावतिव्याप्तिरतोवाक्यत्वं॥ आप्तत्वं
चप्रयोगहेतुभूतयथार्थज्ञानवत्त्वं॥ तथाचप्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमितिपर्यव
सन्नोर्थः ॥वस्तुतस्तुपदज्ञानंकरणं॥वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिर्व्यापा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रः॥ वाक्यार्थज्ञानंशाब्दबोधःफलं॥वृत्तिर्नामशक्तिलक्षणान्यतररूपा॥शक्तिर्नामघटादिपदजन्यबोधविषयत्व
प्रकारकेश्वरसंकेतः॥ ईश्वरसंकेतोनामईश्वरेच्छा॥ सैवशक्तिरित्यर्थः॥शक्तिनिरूपकत्वमेवपदेशक्तत्वंविषय
तासंबंधेनशक्त्याश्रयत्वमर्थेशक्यत्वं॥शक्यसंबंधोलक्षणा॥साद्विविधा॥गौणीशुद्धाचेति॥गौणीनामसादृश्यवि
शिष्टेलक्षणा यथासिंहोमाणवकइत्यादौ॥सिंहपदस्यसिंहसादृश्यविशिष्टेलक्षणा॥शुद्धात्रिविधा।जहल्लक्षणा।अज
हल्लक्षणा॥जहदजहल्लक्षणाचेति।लक्ष्यतावच्छेदकरूपेणलक्ष्यमात्रबोधप्रयोजिकालक्षणा जहल्लक्षणा॥ य
थागंगायांघोषइत्यत्रगंगापदशक्यप्रवाहसंबंधस्यतीरेसत्वात्तादृशशक्यसंबंधरूपलक्षणाज्ञा
नाद्गंगापदात्तीरोपस्थितिः ॥लक्ष्यतावच्छेदकरूपेणलक्ष्यशक्योभयबोधप्रयोजिकालक्षणाअ
जहल्लक्षणा॥ यथाकाकेभ्योदधिरक्ष्यतामित्यत्रकाकपदस्यदध्युपघातकेलक्षणा॥लक्ष्यतावच्छे
दकंदध्युपघातकत्वंतेनरूपेणदध्युपघातकानांसर्वेषांकाकबिडालकुक्कुटादीनांशक्यलक्ष्याणांबो
धात्॥शक्यतावच्छेदकपरित्यागेनव्यक्तिमात्रबोधप्रयोजिकाजहदजहल्लक्षणा॥यथातत्त्वमसी॰

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यत्र सर्वज्ञत्वकिंचिज्ज्ञत्वपरित्यागेन व्यक्तिमात्रबोधनात् जहदजहल्लक्षणा॥ इयं च लक्षणा जीव
ब्रह्मणोरैक्यं वदतां वेदांतिनां सिद्धांतरीत्या ॥ आकांक्षेति ॥ अव्यवहितोत्तरत्वादिसंबंधेन यस्य यद्
प्रकारकज्ञानव्यतिरेकप्रयुक्तो हि यादृशशाब्दबोधाभावस्तादृशशाब्दबोधे तत्पदे तत्पदवत्त्वमाकां
क्षा॥ यथा घटमित्यादिस्थले ऽव्यहितोत्तरत्वादिसंबंधेनामुपदं घटपदवदित्याकारकामुपदविशे
ष्यकघटपदप्रकारकज्ञानसत्त्वे घटीयं कर्मत्वमिति बोधो जायते अमु घट इति विपरीतोच्चारणे तु ता
दृशज्ञानाभावात्तादृशशाब्दबोधो न जायते ऽतस्तादृशाकांक्षाज्ञानं शाब्दबोधे कारणं॥ अर्थाबाध
इति॥ बाधाभावो योग्यतेत्यर्थः॥ अग्निना सिंचतीत्यत्र सेककरणत्वस्य जलधर्मस्य वन्हौ बाधनि
श्चयसत्वान्न तादृशवाक्याच्छाब्दबोधः॥ सन्निधिं निरूपयति॥ असहोच्चरितानीति॥ असहोच्च
रितानि विलंबोच्चरितानि॥ वैदिकमिति॥ वेदवाक्यमित्यर्थः॥ इदमुपलक्षणं॥ वेदमूलकस्मृत्या
दीन्यपि ग्राह्याणि॥ लौकिकेति॥ वेदवाक्यभिन्नमित्यर्थः॥ ॥ इति शाब्दपरिच्छेदः समाप्तः॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

टी यथार्थानुभवनिरूप्यायथार्थानुभवंविभजते॥संशयेत्यादिना॥एकेति॥एकधर्मावच्छिन्नविशेष्य
७ कभावाभावप्रकारकज्ञानंसंशयइत्यर्थः॥भावद्वयकोटिकसंशयाप्रसिद्धेः स्थाणुर्नवेत्यादेःस्थाणुत्व
स्थाणुत्वाभावपुरुषत्वपुरुषत्वाभावकोटिकसंशयएवार्थः॥मिथ्याज्ञानमिति॥अयथार्थज्ञानमि
त्यर्थः॥विपर्ययोनामभ्रमः व्याप्यारोपेणेति॥तर्केव्याप्यस्यव्यापकस्यचबाधनिश्चयःकारणं॥
अन्यथेष्टापत्तिदोषेणतर्कानुत्पत्तेः॥सुखंनिरूपयति॥सर्वेषामिति॥इतरेच्छाऽनधीनेच्छाविष
यत्वमितिनिष्कर्षः यथाश्रुतेघटोनुकूलइत्याकारकानुकूलत्वप्रकारकज्ञानविशेष्यत्वस्यघटादा
वपिसत्वात्तत्रातिव्याप्तिः॥सुखेच्छाधीनेभोजनादावतिव्याप्तिवारणायेतरेच्छानधीनेतीच्छाविशेष
णं॥सुखेच्छातुसुखत्वप्रकारकज्ञानजन्यैव॥दुःखंनिरूपयति॥प्रतिकूलेति॥अत्रापीतरद्वेषान
धीनद्वेषविषयत्वमितिनिष्कर्षः॥द्वेषविषयत्वमात्रोक्तौसर्पादावतिव्याप्तिस्तत्रापिद्वेषविषयत्वस राम
त्वादतस्तत्रातिव्याप्तिवारणायेतरद्वेषानधीनेतिद्वेषविशेषणं॥सर्पजन्यदुःखादौद्वेषात्सर्पद्वेषइ १७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तिसर्पद्वेषस्यसर्पजन्यदुःखद्वेषजन्यत्वादन्यद्वेषाजन्यद्वेषविषयत्वरूपलक्षणस्यसर्पादौनातिव्या
प्तिः ॥ फलेच्छाउपायेच्छांप्रतिकारणमतः फलेच्छावशादुपायेच्छाभवत्येवंफलद्वेषादुपायद्वेषः ॥
धर्माधर्मौनिरूपयति ॥ विहितेत्यादिना ॥ वेदविहितेत्यर्थः ॥ निषिद्धेति ॥ वेदनिषिद्धेत्यर्थः ॥ भावनां
लक्षयति ॥ अनुभवेति ॥ अनुभवजन्यत्वेसतिस्मृतिहेतुत्वंभावनायालक्षणं ॥ अत्रानुभवजन्य
त्वेसतीतिविशेषणानुपादानेआत्ममनःसंयोगेतिव्याप्तिरात्ममनःसंयोगस्यज्ञानमात्रंप्रत्यस
मवायिकारणत्वेनस्मृतिंप्रत्यपिकारणत्वादतस्तदुपादानं ॥ आत्ममनःसंयोगस्यानुभवजन्यत्वाभ
वान्नातिव्याप्तिः ॥ तावन्मात्रेकृतेऽनुभवध्वंसेतिव्याप्तिः ॥ ध्वंसंप्रतिप्रतियोगिनःकारणत्वेनानुभवध्वं
सस्याप्यनुभवजन्यत्वादतःस्मृतिहेतुत्वोपादानं ॥ अनुभवध्वंसेस्मृतिहेतुत्वाभावान्नातिव्याप्तिः
॥ नन्वत्रविशिष्टबुद्धिंप्रतिविशेषणज्ञानस्यकारणतासकलतांत्रिकमतसिद्धा ॥ यथादंडविशिष्ट
बुद्धिंप्रतिदंडज्ञानंकारणंदंडविशिष्टबुद्धिर्नामदंडप्रकारकज्ञानं ॥ तथाचदंडप्रकारकबुद्धित्वाव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छिन्नंप्रति दंडज्ञानत्वेन कारणत्वमित्यापतितं॥ दंडप्रकारकबुद्धिर्दंडीपुरुषइत्याकारकबुद्धिस्तत्र
दंडज्ञानं कारणं नहि दंडमजानानः पुमान् दंडीपुरुष इति प्रत्येति॥ एवंच यत्रायं दंड इति प्रत्यक्षं जा
तं तदनंतरं दंडीपुरूषइत्याकारकप्रत्यक्षमुत्पन्नं॥ तत्र दंडीपुरुषइत्याकारकप्रत्यक्षेतिव्याप्तिस्तद्धि
स्वाव्यवहितपूर्वक्षणोत्पन्नदंडज्ञानात्मकानुभवजन्यं जनिष्यमाणे दंडीपुरुषइत्याकारकस्मरणे
कारणं च स्मृतिं प्रत्यनुभवस्य कारणत्वात्॥ तथा चानुभवजन्यत्वे सति स्मृतिहेतुत्वरूपभावनाल
क्षणस्य यथोक्त दंडीपुरुषइत्याकारकानुभवे विद्यमानत्वादति व्याप्तिरिति चेन्न॥ अत्र ब्रूमः॥ अनुभ
वजन्यत्वं अनुभवनिष्ठकारणतानिरूपितकार्यताश्रयत्वं तत्र कारणतायामनुभवत्वावच्छिन्नत्वं नि
वेश्यते तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वमनुभवजन्यत्वमिति फलितमते
नोक्तातिव्याप्तिः॥ तथाहि॥ दंडप्रकारकबुद्धित्वावच्छिन्नकार्यतानिरूपितदंडज्ञाननिष्ठाकारण

तातस्यां दंडानुभवत्वमवच्छेदकं दंडानुभवाद्दंडस्मरणादपि दंडप्रकारकबुद्धेरुत्पत्तेरतो दंडप्र

For Private and Personal Use Only

कारकबुद्धित्वावच्छिन्नं प्रत्यनुभवस्मरणसाधारणदंडज्ञानत्वेनैव दंडज्ञानस्य कारणतायाः स्वीक
रणीयत्वेन दंडज्ञानत्वस्यैव तदवच्छेदकत्वात्तथा चानुभवत्वावच्छिन्न कारणतानिरूपितकार्यता
श्रयत्वस्य यथोक्तप्रत्यक्षानुभवेः भावान्नातिव्याप्तिः भावनायां लक्षणमिदं वर्त्तते॥ तथाहि अनुभवेनै
व भावनाख्यसंस्कारोत्पत्त्या भावनात्वावच्छिन्नं प्रत्यनुभवस्यानुभवत्वेनैव कारणतया भावनात्वा
वच्छिन्नकार्यतानिरूपितानुभवनिष्ठाकारणता तस्यामनुभवत्वमवच्छेदकमतोनुभवत्वावच्छि
न्नकारणतानिरूपितकार्यताश्रयत्वं भावनायां वर्तत इति नासंभवः नन्वेवं स्मृतिहेतुत्वविशेषणवै
य्यर्थ्यमापद्यते तर्ह्यनुभवध्वंसेतिव्याप्ति वारणाय प्राग्रुपात्तं हि यथोक्तानुभवजन्यत्वविवक्षायां
मनुभवध्वंसेतिव्याप्तिः प्रसज्यते तथाहि ध्वंसत्वावच्छिन्नं प्रतिप्रतियोगिनः कारणत्वं प्रतियोगित्वे
नरूपेण तत्तध्वंसत्वावच्छिन्नं प्रतितत्तत्प्रतियोगिव्यक्तेस्तद्व्यक्तित्वेन च कारणत्वमित्येव ध्वंस
प्रतियोगिनोः कार्यकारणभावस्तथा च ध्वंसनिष्ठकार्यतानिरूपितायानुभवनिष्ठाकारणता त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यां प्रतियोगित्वमवच्छेदकं तत्तद्व्यक्तित्वं च न त्वनुभवत्वमपीति सिद्धांतादन्यत्र दूषितत्वात्तथा चानु
भवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपानुभवजन्यत्वविरहेणैवातिव्याप्तिवारणसं
भवात्कृतं स्मृतिहेतुत्वविशेषणेनेति चेन्न ॥ स्मृतावतिव्याप्तिवारणायैव तद्विशेषणप्रवेशात्तथा
हि स्मृतिं प्रत्यनुभव एव कारणं न तु स्मृतिरप्यतो घटस्मृतित्वावच्छिन्नं प्रति घटानुभवस्य घटानु
भवत्वेनैव कारणत्वं न तु घटज्ञानत्वेन तथा च घटस्मृतिनिष्ठकार्यतानिरूपिता या घटानुभवनि
ष्ठकारणता तस्यां घटानुभवत्वमवच्छेदकं तेनानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रय
त्वस्य स्मृतौ विद्यमानत्वान्न हि स्मृतिः स्मृतिहेतुरतो न तत्रातिव्याप्तिरित्यलं ॥ सामान्यं निरूपय
ति ॥ नित्यमेकमिति ॥ नित्यत्वे सत्यनेकसमवेतत्वं सामान्यलक्षणं नित्यत्वानुपादाने संयोगादाव
तिव्याप्तिः आकाशादावतिव्याप्तिवारणायानेकसमवेतत्वं जलपरमाणुरूपादावतिव्याप्तिरतो ऽ राम·
नेकेति ॥ नित्यद्रव्यवृत्तय इति ॥ नित्यद्रव्येषु परमाण्वादिषु वर्तमानाः अत एव व्यावर्तका इतर १९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेदानुमितिहेतवः नित्यद्रव्यवृत्तित्वरूपपक्षधर्मताप्रयोज्येतरभेदानुमापकताशालिन इत्यर्थः॥
नित्यद्रव्यनिष्ठविशेष्यतानिरूपितैकमात्रवृत्तिभेदानुमितिजनकतावच्छेदकप्रकारताश्रयत्वंवि
शेषाणां लक्षणमितिभावः॥ पार्थिवपरमाणौजलादिभेदानुमापकगंधेतिव्याप्तिवारणायैकमात्रवृ
त्तित्वंभेदविशेषणं॥ घटादौतदितरभेदानुमापकेतद्रूपादावतिव्याप्तिवारणायनिरूपितांतंप्रका
रताविशेषणं॥एतेनव्यावर्तकाइत्यस्यनित्यद्रव्यविशेष्यकेतरभेदानुमितिप्रयोजकाइत्यर्थक
तयालक्षणपरत्वेन साफल्येपिनित्यद्रव्यवृत्तयइतिविफलमेवस्वरूपाख्यानस्यापिकृतत्वादि
तिप्रत्युक्तं॥ ययोर्मध्यइति॥ यन्निष्ठकालनिरूपिताधेयतासामान्यंयदवच्छिन्नंतदुभयान्यतर
त्वमयुतसिद्धत्वमित्यर्थः त्रैकालिकेति॥ प्रागभावाप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वेसत्य
न्योन्याभावभिन्नत्वेसत्यभावत्वमत्यंताभावस्यलक्षणं॥ ध्वंसप्रागभावान्योन्याभावाकाशा
भावादीनांवारणाययथाक्रमंविशेषणोपादानं॥ वस्तुतस्तुसंसर्गाभावत्वंतादात्म्यभिन्नसंबं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धावच्छिन्नप्रतियोगिताकाभावत्वं ध्वंसप्रागभावयोश्च नसंसर्गावच्छिन्नप्रतियोगिताकत्वमिति
तेनैवतद्वारणेत्रैकालिकेतिस्वरूपाख्यानमेवेतिबोध्यं॥ तादात्म्येति अभावत्रयवारणायविशेष
णं घटाभाववान्नेतिप्रतीतिविषयघटादिवारणायविशेष्यं॥ ननुसादृश्यादीनामतिरिक्तपदार्था
नामनिरूपणेनन्यूनतेत्यतआह॥ सर्वेषामिति॥ तद्भिन्नत्वविशिष्टतद्गतभूयोधर्मरूपसादृश्य
स्यापिघटपटादिरूपत्वेननातिरिक्तत्वमेवमन्येषामप्यूह्यं॥ कृष्णावलंबितोगाःपुपोषगोवर्धन
स्त मभ्यर्चयन् विपुलाभीरसभाजनजनितबुधेंद्रस्तवाभिरचनाभिः। इतितर्कसंग्रहव्याख्या
न्यायबोधिन्याख्यासमाप्ता॥७॥ ॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रा
यामंकितोयंशिलाक्षरैः॥१॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपास
श्रीयुतमहाराजशिवलालदुबेजीइनकेमकानमेकाशीसंस्कृतमुद्रायन्त्रमेछपीजिनकोले
नाहोयउन्होनेइसछापेखानेकेकार्यसंपादकश्रीयुत्बाबूवाराणसीप्रसादपाकचौरीगली

For Private and Personal Use Only

Shree Vijaya Dharma Laxmi Gyan Mandir
Belangan, AGRA.